শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৰেঙ্কটনাথার্যঃ কৰিতার্কিককেসরী।
ৰেদান্তাচার্যৰর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী শঙ্করাচার্য ৰিরচিতম্
# ॥শ্রী অচ্যুতাষ্টকম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TeX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রী অচ্যুতাষ্টকম্ ॥

রাঘৱং করুণাকরং মুনিসেৱিতং সুরৱন্দিতং
জানকীৱদনারৱিন্দদিৱাকরং গুণভাজনম্।
ৱালিসূনুহিতৈষিণং হনুমতপ্রিযং কমলেক্ষণং
যাতুধানভযঙ্করং প্রণমামি রাঘৱকুঞ্জরম্॥ ১ ॥

মৈথিলীকুচভূষণামল নীলমৌক্তিকমীশ্বরং
রাৱণানুজপালনং রঘুপুঙ্গৱং মম দৈৱতম্।
নাগরীৱনিতাননাম্বুজবোধনীযদিৱাকরং
সূর্যৱংশৱিৱর্ধনং প্রণমামি রাঘৱকুঞ্জরম্॥ ২ ॥

হেমকুণ্ডলমণ্ডিতামলকণ্ঠদেশমরিন্দমং
শাতকুম্ভ মযূরনেত্রৱিভূষণেন ৱিভূষিতম্।
চারুনূপুরহারকৌস্তুভকর্ণভূষণভূষিতং
ভানুৱংশৱিৱর্ধনং প্রণমামি রাঘৱকুঞ্জরম্॥ ৩ ॥

দণ্ডকাখ্যৱনে রতামরসিদ্ধযোগিগণাশ্রযং
শিষ্টপালনততপরং ধৃতিশালিপার্থকৃতস্তুতিম্।
কুম্ভকর্ণভুজাভুজঙ্গৱিকর্তনে সুৱিশারদং
লক্ষ্মণানুজৱতসলং প্রণমামি রাঘৱকুঞ্জরম্॥ ৪ ॥

কেতকীকরৱীরজাতিসুগন্ধিমাল্যসুশোভিতং
শ্রীধরং মিথিলাত্মজাকুচকুঙ্কুমারুণৱক্ষসম্।
দেৱদেৱমশেষভূতমনোহরং জগতাং পতিং
দাসভূতভযাপহং প্রণমামি রাঘৱকুঞ্জরম্॥ ৫ ॥

যাগদানসমাধিহোমজপাদিকর্মকরৈর্দ্বিজৈঃ
ৱেদপারগতৈরহর্নিশমাদরেণ সুপূজিতম্।
তাটকাৱধহেতুমঙ্গদতাতৱালিনিষূদনং
পৈতৃকোদিতপালকং প্রণমামি রাঘৱকুঞ্জরম্॥ ৬ ॥

www.prapatti.com

লীলযা খরদূষণাদিনিশাচরাশুৱিনাশনং
রাৱণান্তকমচ্যুতং হরিযূথকোটিগণাশ্ৰযম্।
নীরজাননমম্বুজাঙ্ঘ্ৰিযুগং হরিং ভুৱনাশ্ৰযং
দেৱকার্যৱিচক্ষণং প্ৰণমামি রাঘৱকুঞ্জরম্॥ ৭ ॥

কৌশিকেন সুশিক্ষিতাস্ত্ৰকলাপমাযতলোচনং
চারুহাসমনাথবন্ধুমশেষলোকনিৱাসিনম্।
ৱাসৱাদিসুরারিরাৱণশাসনং চ পরাঙ্গতিং
নীলমেঘনিভাকৃতিং প্ৰণমামি রাঘৱকুঞ্জরম্॥ ৮ ॥

রাঘৱাষ্টকমিষ্টসিদ্ধিদমচ্যুতাশ্ৰযসাধকং
মুক্তিভুক্তিফলপ্ৰদং ধনধান্যসিদ্ধি ৱিৱর্ধনম্।
রামচন্দ্ৰকৃপাকটাক্ষদমাদরেণ সদা জপেৎ
রামচন্দ্ৰপদাম্বুজদ্বয সন্ততার্পিতমানসঃ॥ ৯ ॥

রাম রাম নমোস্তু তে জয রামভদ্ৰ নমোস্তু তে
রামচন্দ্ৰ নমোস্তু তে জয রাঘৱায নমোস্তু তে।
দেৱদেৱ নমোস্তু তে জয দেৱরাজ নমোস্তু তে
ৱাসুদেৱ নমোস্তু তে জয ৱীররাজ নমোস্তু তে॥ ১০ ॥

॥ইতি শ্ৰী অচ্যুতাষ্টকম্ সমাপ্তম্॥

www.prapatti.com